ANNUAL EXAMINATION

Question Paper 2024

NCERT BASED SYLLABUS

FOR CBSE AND STATE BOARD
FOLLOWING NCERT

सत्रान्त-परीक्षा **(2023-24)**

कक्षा- अष्टमी

विषय:- संस्कृतम्

समय:- सार्द्धहोराद्वय पूर्णांका:- षष्टि:**(60)**

छात्र/छात्रा नाम-..... कक्षा **&** वर्ग:-.....

अनुक्रमांक:-..... दिनाँक:-..... निरीक्षकस्य हस्ताक्षरम्-.....

प्राप्तांका:-( ) परीक्षकस्य हस्ताक्षरम्-.....

निर्देशा:-

1. निर्देशानुसारेण सर्वाणि प्रश्नोत्तराणि प्रदत्त रिक्त स्थानेषु लेखितव्यानि।

2. प्रश्न पत्रे चत्वार: खण्डा: सन्ति।

क. अपठित अवबोधनम्- 10 अंका:

ख. रचनात्मक लेखनम्- 10 अंका:

ग. अनुप्रयुक्त व्याकरणम्- 15 अंका:

घ. पठित अवबोधनम्- 25 अंका:

खण्ड: - क (अपठित-अवबोधनम्)

प्रश्न:-**1** निम्नगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**5**

भारतवर्षः कृषिप्रधान-देशः। अत्र अनेके जनाः ग्रामेषु निवसन्ति। कृषकाः कृषि-कार्यं कुर्वन्ति अन्नानि च उत्पादयन्ति। अन्नं विना कुतः जीवनम्? कृषिकार्यं विना च कथम् अन्नानाम् उत्पादनम् भवेत्? अतः ग्रामाणां कृषकाणां च महत्त्वम्। केचित् ग्रामीणाः स्वे-स्वे गृहे स्थित्वा कार्याणि कुर्वन्ति। यथा लौहकाराः लौहकार्यम् कुर्वन्ति, कुम्भकाराः घयन् रचयन्ति, तक्षकाः काष्ठेन मञ्चकान्, फलकान् आसन्दिकाः च रचयन्ति। अनेकेषु ग्रामेषु विद्युत्-सुविधा न अस्ति। जलानाम् अभावे कृषिः अपि इष्टम् फलं न ददाति। वस्तुतः ग्राम्य-जीवनम् अति कठिनम्। परम् ग्रामीणाः अल्पेन एवं सन्तुष्टाः भवन्ति।

1. एकपदेन उत्तरत– **1×2=2**

(क) भारतवर्षः कीदृशः देश: ?

.....

(ख) के अन्नानि उत्पादयन्ति ?

.....

2. पूर्णवाक्येन उत्तरत– **2×1=2**

(क) तक्षकाः किं कुर्वन्ति ?

schools.aglasem.com

aglasem.com

……

3. (भाषिककार्यम्)-निर्देशानुसारं उत्तरत- **1/2×2=1**

(क) 'जलानाम् अभावे कृषिः अपि इष्टं फलं न ददाति' इति वाक्ये कर्तृपदम् किम् ?

……

(ख) 'भवन्ति' इति क्रियापदे का धातु:?

……

प्रश्न:**-2** अधःप्रदत्तं चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत- **1×5=5**



1……

2……

3……

4……

5……

खण्ड:- ख (रचनात्मक लेखनम्)

प्रश्न:**-3** मञ्जूषात: पदानि चित्वा कथां पूरमत- **1/2×10=5**

(कश्चन, दूरे, नीचै:, यदा, तदा, यदि, तर्हि, परम्, च, सहसा)

एकस्मिन् वने……व्याध: जालं विस्तीर्य……स्थित:। क्रमश: आकाशात् सपरिवार: कपोतराज:..... आगच्छत्। ……कपोता: तण्डुलान् अपश्यन्…… तेषां लोभो जात:। परम् राजा सहमत: नासीत्। तस्य युक्ति: आसीत्…… वने कोऽपि मनुष्य: नास्ति।……कुत: तण्डुलान् सम्भव:।

schools.aglasem.com

aglasem.com

..... राज्ञः उपदेशम् अस्वीकृत्य कपोतः तण्डुलान् खादितुं प्रवृत्तः जाले.....

निपतिताः। अतः उक्तम्..... विदधीत न क्रियाम्।

प्रश्न:**-4** अधोलिखितानि पदानि आधृत्य वाक्यानि रचयत- **1×5=5**

1.स्वकीयम्**-.....**।

2. सक्रिया**-.....**।

3. मुखरम्**-.....**।

4. परकीयम्**-.....**।

5. विषमता**-.....**।

खण्ड:**-**ग **(**अनुप्रयुक्त व्याकरणम्**)**

प्रश्न:**-5** निर्देशानुसारं लकारपरिवर्तनं कुरुत - **1×4=4**

यथा**-** सा शिक्षिका अस्ति। **(**लङ्लकार:**)** सा शिक्षिका आसीत्।

1. सा अध्यापने संलग्ना भवति । (लृट् लकारे)

.....

2. सः त्रयोदशवर्ष कल्पः अस्ति। (लङ्लकारे)

.....

3. महिलाः तडागात् जलं नयन्ति। (लोट् लकारे)

.....

4. वयं प्रतिदिनं पाठं पठामः। (विधिलिङ्ग लकारे)

.....

प्रश्न:**-6** अधोलिखितपदानां सन्धिविच्छेदं/सन्धि**:** वा विकल्पेभ्यः चिनुत- **1x4=4**

1) कालातिगमिनी = ... + ...

(क) कल +अतिगमिनि (ख) काल+ अतीगमिनि

(ग) काल+अतिगामीनि (घ) काल+अतिगामिनी

2) सूर्य + अचलः = ...

schools.aglasem.com

aglasem.com

(क) सुर्यचल (ख) सूर्यचल:

(ग) सूर्याचलः (घ) सुर्याचल:

3) तथा + एव = ... + ...

(क) तथेव (ख) तथैव (ग) तथाव (घ) तथिव

4) वृक्षाग्रवासी = ... + ...

(क) वृक्ष + अग्रवासी (ख) वृक्षः + अग्रवासी (ग) वृक्ष + आग्रवासी (घ) वृक्षा + आग्रवासी

प्रश्न:**-7** उचित मेलनं कुरुत- **1/2×4=2**

क. विशेष्य- पदानि ख. विशेषण- पदानि

1.अयम् 1. संस्कृति:.....

2. संस्कृति विशिष्टायाम् 2. इतिहासे.....

3. महत्वाधायिनी 3. प्रदेश:.....

4. प्राचीने 4. भारतभूमौ.....

प्रश्न:**- 8** उदाहरणमनुसृत्य तृतीया विभक्तिं प्रयुज्य रिक्त स्थानानि पूरयत- **1×5=5**

क. ..... सह पुत्रीं गच्छति। (मातृ)

ख. ..... विना विद्या न लभ्यते। (परिश्रम)

ग. छात्र:..... लिखति। (लेखनी)

घ. सूरदास: .....अन्ध: आसीत्। (नेत्र)

ङ. स: .....साकं समयं यापयति। (मित्र)

खण्ड:-घ (पठितावबोधनम्)

प्रश्न:**-9** निम्न संवादं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत- **1×4=4**

(ग्रीष्मर्तौ सायंकाले विद्युदभावे प्रचण्डोष्मणा पीडितः वैभवः गृहात् निष्क्रामति)

वैभवः – अरे परमिन्दर्! अपि त्वमपि विद्युदभावेन पीडितः बहिरागतः?

परमिन्दर् – आम् मित्र! एकतः प्रचण्डातपकालः अन्यतश्च विद्युदभावः परं बहिरागत्यापि पश्यामि यत् वायुवेगः तु सर्वथाऽवरुद्धः। सत्यमेवोक्तम् ।

schools.aglasem.com

aglasem.com

प्राणिति पवनेन जगत् सकलं, सृष्टिर्निखिला चैतन्यमयी।
क्षणमपि न जीव्यतेऽनेन विना, सर्वातिशायिमूल्यः पवनः॥

विनय:- अरे मित्र! शरीरात् न केवलं स्वेद बिन्दव: अपितु स्वेदधारा: इव प्रस्रवन्ति।

1. वैभवः केन पीडितः गृहात् निष्क्रामति?

……..

2. परमिन्दर् बहिः आगत्य किं पश्यति?

……..

3. सकलं जगत् केन प्राणिति?

……

4. 'शरीरात्' इति पदे का विभक्ति:?

……

प्रश्न**:-10** निम्न श्लोकं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत- **1×4=4**

यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम्।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि।।

1. कौ क्लेशं सहेते?

……

2. कदा मातापितरौ क्लेशं सहेते?

……

3. मातापित्रोः क्लेशस्य निष्कृतिः कैः अपि कर्तुं न शक्यते?

…… … ..

4. 'क्लेशम्' इति शब्दस्य क: अर्थ:?

……

प्रश्न**:-11** रेखांकित पदानि आधृत्य प्रश्न निर्माणं कुरुत- **1×5=5**

schools.aglasem.com

aglasem.com

क. प्रसन्नताया: विषयोऽयम्।

……..

ख. सर्वकारस्य घोषणा अस्ति।

……

ग. अहम् स्वापराधं स्वीकरोमि।

……

घ. समयात् पूर्वम् आयासं करोषि।

……

ङ. अम्बिका क्रोडे उपविशति।

……

प्रश्न**:-12** समुचित कथनानां समक्षम् ' आम् ' तथा अनुचित कथनानां समक्षं ' न ' इति लिखत-

1×5=5

क. निज निकेतनं गिरिशिखरे अस्ति। ……

ख. स्वकीयं बलं बाधकं भवति। …….

ग. पथि हिंस्रा: पशव: न सन्ति। …….

घ. गमनं सुकरम् अस्ति। …….

ङ. सदैव अग्रे एव चलनीयम्। …….

प्रश्न:-13 भिन्नप्रकृतिकं पदं चिनुत- **1/2×4=2**

(1) गच्छति, पठति, धावति, अहसत्, क्रीडति। ……..

(2) छात्र:, सेवकः, शिक्षकः, लेखिका, क्रीडकः।……

(3) पत्रम्, मित्रम्, पुष्पम्, आम्रः, फलम्।……

(4) पृथिवी, वसुन्धरा, धरित्री, यानम्, वसुधा।……

प्रश्न**:-14** अधोलिखित पदानां विपरीतार्थकपदानि लिखत- **1/2×6=3**

क. पुरतः-.....

ख. अनुरक्तिः-.....

schools.aglasem.com

aglasem.com

ग. समादरः-.....

घ. भीतिः-.....

ङ. वरिष्ठा-.....

च. प्रशंसितम्-.....

प्रश्नः- 15 समानार्थकपदानि चित्वा लिखत- **1/2x4=2**

1. पृथिव्याम् ..... (क्षितौ/पर्वतेषु/त्रिलोक्याम्)

2. सुशोभते ..... (लिखते/भाति/पिबति)

3. बुद्धिमताम् ..... (पर्वणाम्/उत्सवानाम्/विपश्चिज्जनानाम्)

4. मयूराणाम् ..... (शिखीनाम्/शुकानाम्/पिकान्ाम्)

---

schools.aglasem.com

aglasem.com

सत्रान्त परीक्षा - 2023-24
विषय:- संस्कृतम्
कक्षा- अष्टमी
पूर्णांका:- षष्टि: (60)
उत्तर कुञ्जिका/ अंक योजना

खण्ड:- क अपठित अवबोधनम्- 05 अंका:
प्रश्नोत्तरम् - 1 अपठित गद्यांशम्-
1.एकपदेन उत्तरत-1×2=2
क. कृषिप्रधान:
ख. कृषका:
2. पूर्णवाक्येन उत्तरत-2×1=2
क. तक्षका: काष्ठेन मञ्चान् , फलकान् , आसन्दिका: च रचयन्ति।
3. भाषिक कार्यम्-1/2×2=1
क. कृषि: इति कर्तृपदम्
ख. भू धातु:

प्रश्नोत्तरम्- 2 चित्रं दृष्ट्वा संस्कृतेन पञ्च वाक्यानि-1×5=5
छात्रा: भिन्न- भिन्न पञ्च संस्कृत वाक्यानि रचयन्ति, अत: स्व विवेकेन अंकानि प्रदीयतानि।

खण्ड:- ख रचनात्मक लेखनम्-10 अंका:

प्रश्नोत्तरम्- 3 मञ्जूषात: पदानि चित्वा कथा पूरणम्-1/2×10=5
क्रमशः- कश्चन , दूरे , नीचै: , यदा , तदा , यदि , तर्हि , परम् , च , सहसा।
प्रश्नोत्तरम्- 4 पदेन वाक्य रचना- 1×5=5
छात्रा: भिन्न पञ्च वाक्यानि रचयन्ति, अत: स्वविवेकेन अंकानि प्रदीयतानि।

खण्ड:- ग अनुप्रयुक्त व्याकरणम्- 15 अंका:
प्रश्नोत्तरम्- 5 लकार परिवर्तनम्- 1×4=4

1. सा अध्यापने संलग्ना भविष्यति।
2. स: त्रयोदश वर्षकल्प: आसीत्।
3. महिला: तडागात् जलं नयन्तु।
4. वयं प्रतिदिनं पाठं पठेम।

प्रश्नोत्तरम्- 6 सन्धिविच्छेदम् / सन्धि:- 1×4=4

1. घ. काल + अतिगामिनी
2. ग. सूर्याचल:
3. ख. तथैव
4. क. वृक्ष + अग्रवासी

प्रश्नोत्तरम्- 7 उचित मेलनम् - विशेषण- विशेष्य- 1/2×4=2

1. अयम् प्रदेश:
2. संस्कृति विशिष्टायाम् भारतभूमौ

schools.aglasem.com
aglasem.com

3. महत्वाधायिनी संस्कृति:
4. प्राचीने इतिहासे

प्रश्नोत्तरम्- 8 तृतीया विभक्तिं प्रयुज्य रिक्त स्थान पूरणम्- 1×5=5

क. मात्रा

ख. परिश्रमेण

ग. लेखन्या

घ. नेत्राभ्याम्

ङ. मित्रेण

खण्ड:- घ पठित अवबोधनम्- 25 अंका:

प्रश्नोत्तरम्- 9 संवाद आधारित पूर्णवाक्येन उत्तराणि- 1×4=4

1. वैभव: विद्युदभावेन पीडित: गृहात् निष्क्रामति।
2. परमिन्दर् बहि: आगत्य पश्यति यत् वायुवेग: तु सर्वथाऽवरुद्ध:।
3. सकलं जगत् पवनेन प्राणिति।
4. शरीरात् इति पदे पञ्चमी विभक्ति:।

प्रश्नोत्तरम्- 10 श्लोक आधारित पूर्णवाक्येन उत्तराणि- 1×4=4

1. मातापितरौ क्लेशं सहेते।
2. नृणाम् सम्भवे मातापितरौ क्लेशं सहेते।
3. मातापित्रो: क्लेशस्य निष्कृति: वर्षशतै: अपि कर्तुं न शक्यते।
4. क्लेशम् इति शब्दस्य अर्थ: पीड़ा।

प्रश्नोत्तरम्- 11 रेखांकित पदानि आधृत्य प्रश्न निर्माणम्- 1×5=5

क. कस्या: विषयोऽयम्?

ख. कस्य घोषणा अस्ति?

ग. अहम् किम् स्वीकरोमि?

घ. कस्मात् पूर्वम् आयासं करोषि?

ङ. अम्बिका कुत्र उपविशति?

प्रश्नोत्तरम्- 12 कथनानां समक्षम् आम् तथा न लेखनम्- 1×5=5

क. आम्

ख. न

ग. न

घ. न

ङ. आम्

प्रश्नोत्तरम्- 13 भिन्न प्रकृतिक पदचयनम्- 1/2×4=2

1. असहत्
2. लेखिका
3. मित्रम् / आम्र:
4. यानम्

प्रश्नोत्तरम्- 14 विपरीतार्थकपदानि- 1/2×6=3

क. पृष्ठत:

ख. विरक्ति:

ग. अनादर:

घ. साहस:

schools.aglasem.com

aglasem.com

ङ. कनिष्ठा

च. निन्दितम्/ गर्हितम्

प्रश्नोत्तरम्- 15 समानार्थकपदानि- 1/2×4=2

1. क्षितौ
2. भाति
3. विपश्चिज्जनानाम्
4. शिखीनाम्

।। इति।।

---

schools.aglasem.com

AglaSem Earn while Learn Program. Send your papers and get paid.
Contact: support@aglasem.com aglasem.com

QUESTION PAPERS

GET PREVIOUS YEAR QUESTION PAPERS FOR ALL CLASSES FOR CBSE, ISCSE, ISC AND ALL ALL STATE BOARDS HERE AT AGLASEM.COM

BOARD WISE

- Andhra Pradesh Board Question Papers
- Assam Board Question Papers
- Bihar Board Question Papers
- Chhattisgarh Board Question Papers
- Goa Board Question Papers
- Gujarat Board Question Papers
- Haryana Board Question Papers
- Himachal Pradesh Board Question Papers
- J&K State Board Question Papers
- Jharkhand Board Question Papers
- Karnataka Board Question Papers
- Kerala Board Question Papers
- Madhya Pradesh Board Question Papers
- Maharashtra State Board Question Papers
- Manipur Board Question Papers
- Meghalaya Board Question Papers
- Mizoram Board Question Papers
- Nagaland Board Question Papers
- Orissa Board Question Papers
- Punjab Board Question Papers
- Rajasthan Board Question Papers
- Tamil Nadu Board Question Papers
- Telangana State Board Question Papers
- Tripura Board Question Papers
- Uttarakhand Board Question Papers
- Uttar Pradesh (UP) Board Question Papers
- West Bengal (WB) Board Question Papers